# Sarasvatim Samskritam Ashrayamah

# સરસ્વતીં સંસ્કૃતમાશ્રયામઃ

## Document Information

Text title : Sarasvatim Samskritam AshrayamaH

File name : sarasvatIMsaMskRRitamAshrayAmaH.itx

Category : devii, sanskritgeet, devI

Location : doc_devii

Author : Keshava Darshanacharya

Transliterated by : Suba Ramesh

Proofread by : Suba Ramesh

Description/comments : From Divya Jyoti Sanskrit Divas Oct-Nov 1967

Latest update : December 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 18, 2021

*sanskritdocuments.org*

# સરસ્વતીં સંસ્કૃતમાશ્રયામઃ

આયાન્તુ રે ભારતમાતૃપુત્રાઃ
સરસ્વતીં સંસ્કૃતમાશ્રયામઃ ।
આર્ષોપદેશાનવલમ્બ્ય લોકે
સ્વજીવનં સ્વર્ણયિતું વ્રજામઃ ॥ ૧॥

સા ભારતી યા જગદાદિકાલાત્
મૃત્યોર્મનુષ્યાનમૃતં નયન્તી ।
તમોઽપનોદેન દિશં દિશન્તીં
વિરાજતે ભારતવર્ષમધ્યે ॥ ૨॥

ઇયં ધરા કાન્તમથાન્તરિક્ષં
નીલં નભો મઞ્જુલવન્યમાલાઃ ।
તારસ્વરૈઃ સ્વૈર્મહયન્તિ સર્વે
સ્વીયામિમાં સુન્દરસૌમ્યવાણીમ્ ॥ ૩॥

સા સંસ્કૃતિર્યાં સકલં હિ વિશ્વં
આરાધનીયામથ સેવનીયામ્ ।
સમ્માનવાણીભિરલઙ્કરોતિ
વિરાજતે સંસ્કૃતવાણિમધ્યે ॥ ૪॥

યસ્યા નિતાન્તં વિમલાન્તરાલાદ્
ભાષાઃ સમસ્તા ઉદિતા જગત્યામ્ ।
આદ્યાઙ્કુરૈઃ પ્રાસ્ફુટિ સભ્યતાયા
મહીયસી સૈવ સરસ્વતીયમ્ ॥ ૫॥

યસ્યા નિતાન્તં કવયઃ કવિત્વં
મનીષિણઃ સ્વં મનનીયતત્ત્વમ્ ।
સંસારિણો જીવનદિગ્દિનેશં
વેદોજ્જ્વલાભ્યાં દુદુહુઃ સ્તનાભ્યામ્ ॥ ૬॥

યદસ્મદીયાઃ ખલુ ભારતીયાઃ
સમાદરં પ્રાપ્નુવતે જગત્યામ્ ।
તત્કેવલં સંસ્કૃતવાક્સરણ્યા
જ્ઞાનામ્બુવાહપ્રસરપ્રભાવઃ ॥ ૭॥

કાલાચ્ચિરાદ્દાસ્યવશાત્તથૈવ
પ્લુષ્ટો ગિરો જ્ઞાનનિધિર્યદસ્યાઃ ।
નેયા પરામુન્નતિમદ્ય સર્વૈઃ
સર્વૈઃ પ્રયત્નૈરિયમર્હણીયા ॥ ૮॥

સમાગતં ભારતસુપ્રભાતં
ઉષા નવીના સમુદેતિ ચાગ્રે ।
ઉલ્લાસયન્તીં સ્વયમુલ્લસન્તીં
આયાન્તુ શુભ્રામભિનન્દયામઃ ॥ ૯॥

ઇતિ શ્રીકેશવદર્શનાચાર્યવિરચિતઃ સરસ્વતીં સંસ્કૃતમાશ્રયામઃ ।

Encoded and proofread by Suba Ramesh

*Sarasvatim Samskritam Ashrayamah*
pdf was typeset on December 18, 2021

Please send corrections to *sanskrit@cheerful.com*